श्वमेधे एकविंशतिर्यूपा सन्ति तत्र मध्यमोयूपोऽग्निष्ठसंज्ञः तत्र सप्तदश पशवोनियोजनीयाः अश्वः१ तूपरः२ (शृङ्गोत्पत्तिकालेऽतीतेऽपि शृङ्गहीनः छागः) गोमृगः गवयः ३ । द्वौ चाग्नेयौ ४ एकादशावयवयुक्तौ । अग्निममन्त्रे वक्ष्यमाणा रोहितादयः द्वादश गाव इति सप्तदश पशवोमध्यमयूपे बध्नीयाः । द्वयोरेकादशावयवाश्च मध्ये कृष्णग्रीवः, अश्वस्य रराटे पुरस्तात् ललाटे हन्वोरधस्तात् मेषी, अधोभागे शुक्लौ छागौ, बाह्वोरश्वस्य पूर्व्वपादयोरेकैकः । अश्वस्य नाभ्यां श्यामश्वेतकृष्णरोमाऽजः श्वेतः छागः दक्षिणपार्श्वे, वामे कृष्णः । बहुरोमपुच्छकौ छागौ पश्चात् पादयोरेकैकः । अश्वस्य पुच्छे श्वेतः, वेहत् गर्भघातिनी, वामनः खर्व्वः पशुः पुच्छे एवम् एकादशानामश्वावयवतया कल्पयित्वा तथाविधौ एकादशिनौ द्वौ मध्ययूपे बध्नीयौ अन्येषु एकैक इति भेदः पृषतीत्यादीनां श्वेताः सौर्य्या इत्यन्तानां शतत्रयसङ्ख्यकानां पशूनां मध्ये पञ्चदश पशवः एकैकस्मिन् अश्वादयस्त्रयः एते द्वादश च इत्येते पर्य्यङ्ग उच्यन्ते । अत्राश्वस्य शरीरं तुम्बीफलवत् रज्ज्वा गुम्फनीयम् । ततः कृष्णग्रीव इत्यादयः अश्वस्य शरीरे यथोक्तस्थाने संबद्धा रज्ज्वा बध्नीयाः ततो रोहितादयः वक्ष्यमाणा द्वादश नियोज्याः इतरेषु विंशतौ यूपेषु पञ्चदश पञ्चदश पशवः प्रत्येकमेकादशिनः इतिषोडश इति भेदः"।

अश्वादिपशुभेदाः देवसहिताः यजु अ० २४ उक्ता यथा "अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीव आग्नेयो रराटे । पुरस्तात्सारस्वती मेष्यधस्ताद्धन्वोराश्विनावधोरामौ बाह्वोः सौमापौष्णः, श्यामोनाभ्यां, सौर्य्ययामौ श्वेतश्च कृष्णश्च, पार्श्वयोस्त्वाष्ट्रौ लोमशसक्थौ, सक्थ्योर्वायव्यः श्वेतः, पुच्छइन्द्राय स्वपस्याय, वेहद्वैष्णवोवामनः१ । रोहितोधूम्ररोहितः कर्कन्धुरोहितस्ते सोम्या, बभ्रुररुणबभ्रुः शुकबभ्रुस्ते वारुणाः, शितिरन्ध्रोऽन्यतःशितिरन्ध्रः समन्तशितिरन्ध्रस्ते सावित्राः, शितिबाहुरन्यतःशितिबाहुः समन्तशितिबाहुस्ते वार्हस्पत्याः, पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुण्यः२ । शुद्धवालः सर्वशुद्धवालो मणिवालस्तआश्विनाः, श्येतः श्येताक्षोऽरुणस्ते रुद्राय पशुपतये, कर्णायामा अवलिप्ता रौद्रानभोरूपाः, पार्जन्याः ३ । पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः, फल्गूर्लोहितोर्णी पलक्षी ताः सारस्वत्यः, प्लीहाकर्णः शुण्ठाकर्णोऽध्यालोहकर्णस्ते त्वाष्ट्राः, कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्तऐन्द्राग्नाः" कृष्णाञ्जिरल्पाञ्जिर्महाञ्जिस्तउषस्याः४ । शिल्पा वैश्वदेव्यो, रोहिण्यस्त्र्यवयो वाचे, ऽविज्ञाता अदित्यै, सरूपा धात्रे, वत्सतर्यो देवानां पत्नीभ्यः।५ । कृष्णग्रीवा आग्नेयाः, शितिभ्रवो वसूनां, रोहिता रुद्राणां, श्वेता अवरोकिण आदित्यानां, नभोरूपाः पार्जन्याः।६ । उन्नत ऋषभो वामनस्त ऐन्द्रवैष्णवाः, उन्नतः शितिबाहुः शितिपृष्ठस्त ऐन्द्राबार्हस्पत्याः, शुकरूपा वाजिनाः, कल्माषा आग्निमारुताः, श्यामाः पौष्णाः ।७। एता ऐन्द्राग्ना, द्विरूपा अग्नीषोमीया, वामना अनड्वाह आग्नावैष्णवा, वशा मैत्रावरुण्यो, ऽन्यत एन्यो मैत्र्यः ।८। कृष्णग्रीवा आग्नेया, बभ्रवः सौम्याः, श्वेता वायव्या, अविज्ञाता अदित्यै, सरूपा धात्रे, वत्सतर्यो देवानां पत्नीभ्यः।९। कृष्णा भौमाः, धूम्रा आन्तरिक्षा, बृहन्तो दिव्याः, शबला, वैद्युताः सिध्मास्तारकाः १०। धूम्रान् वसन्तायालभते, श्वेतान् ग्रीष्माय, कृष्णान् वर्षाभ्यो, ऽरुणाञ्छरदे, पृषतो हेमन्ताय, पिशङ्गाञ्छिशिराय ११। त्र्यवयो गायत्र्यै, पञ्चावयस्त्रिष्टुभे, दित्यवाहो जगत्यै, त्रिवत्सा अनुष्टुभे, तुर्य्यवाह उष्णिहे १२। पृष्ठवाहो विराजे, उक्षाणो बृहत्या, ऋषभाः ककुभे, ऽनड्वाहः पङ्क्त्यै, धेनवोऽतिच्छन्दसे १३। कृष्णग्रीवा आग्नेया, बभ्रवः सौम्या, उपध्वस्ताः सावित्रा, वत्सतर्य्यः सारस्वत्याः, श्यामाः पौष्णाः, पृश्नयो मारुता, बहुरूपा वैश्वदेवा, वशा द्यावापृथिवीयाः १४। उक्ताः संचरा एता ऐन्द्राग्नाः, कृष्णा वारुणाः, पृश्नयो मारुताः, कायास्तूपराः १५। अग्नयेऽनीकवते प्रथमजानालभते, मरुद्भ्यः सान्तपनेभ्यः सवात्यान्, मरुद्भ्यो गृहमेधिभ्यो वष्किहान्, मरुद्भ्यः क्रीडिभ्यः संसृष्टान्, मरुद्भ्यः स्वतवद्भ्योऽनुसृष्टान् १६। उक्ताः संचरा एता ऐन्द्राग्नाः, प्राशृङ्गा माहेन्द्रा, बहुरूपा वैश्वकर्म्मणाः १७। धूम्रा बभ्रुनीकाशाः पितॄणां सोमवतां, बभ्रवो धूम्रनीकाशाः पितॄणां बर्हिषदां, कृष्णा बभ्रुनीकाशाः पितॄणामग्निष्वात्तानां, कृष्णाः पृषन्तस्त्रैयम्बकाः १८ । उक्ताः संचराः एता शुनासीरीयाः, श्वेता वायव्याः, श्वेताः सौर्य्याः १९ । एवं समाप्ता यूपाः इत्यश्वाद्याः सौर्य्यान्ताः सप्तविंशत्यधिकशतत्रयमिताः ग्राम्याः पशवः सर्वे उक्ताः । आरण्यानाह । "वसन्ताय कपिञ्जलानालभते, ग्रीष्माय कलविङ्कान्, वर्षाभ्यस्तित्तिरा,ञ्छरदे वर्त्तिका, हेमन्ताय ककरा,ञ्छिशिराय विककरान् २० । समुद्राय शिशुमारानालभते, पर्जन्याय मण्डूका, नद्भ्यो मत्स्या, न्मित्राय कुलीपयान्, वरुणाय नाक्रान् २१ । सोमाय हंसानालभते, वायवे बलाका